NITYA KARMA

1. Wake Up During Brahma Muhurta

Wake Up about 1.5 hours before sunrise.

2. Prātaḥ Smaraṇa

Chant:

वामनाय नमः।

वामनाय नमः।

वामनाय नमः।

---

actualsnek

3. Karadarśanam

Recite:

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती।

करमूले स्थितो गौरी प्रभाते करदर्शनम्॥

Translation: At the tips of the hands resides Lakshmi, in the center Saraswati, and at the base Gauri. Thus, see the palms at dawn.

Now Place right hand on your head and chant:

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्री गुरवे नमः ॥

---

4. Gajendra Mokṣa Smaraṇaṃ

Recall the Gajendra Mokṣa story.

5. Bhūmi Vandanā

Before stepping on the ground, offer respect to Mother Earth:

actualsnek

समुद्रवसने देवि पर्वतस्तनमण्डले।

विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥

Translation: *O* Devi, who has the Ocean as Your garment and mountains as Your bosom, *O* Consort of Vishnu, please forgive the touch of my feet on you.

6. Mātā-Pitā Vandanam

7. Ācamanaṃ

Take a small amount of water in your right hand. Drink three times, and with each sip, *chant:*

ॐ केशवाय नमः

ॐ नारायणाय नमः

ॐ माधवाय नमः

Then, wipe both your hands while *chanting:*

ॐ हृषिकेशाय नमः

8. Freshen up, Pranayama, Yoga, Workout

Sandhyā's a must for every dvija.. pranayama's juz a part of it. Too much to explain here, so I'll just share the link.
Meanwhile, here's the basic flow:

→ Ācamana → Prāṇāyāma → Sankalpa → Mārjana → Mantrācamana → Punarmārjana → Aghamarṣaṇa → Arghya → Gayatrī Japa → Sūryopasthāna → Namaskāra → Udvāsana → Abhivādanam

Attaching a video too.
Anyways...

actualsnek

9. Snānam

If possible, add a small amount of sacred Gaṅgā water to your regular bathing water.

गोमयं यमुना साक्षाद्गोमूत्रं नर्मदा शुभा ।

गंगा क्षीरं तु यासां वै किं पवित्रमतः परम् ॥

While bathing, remember the sacred rivers.

Chant:

गङ्गे च यमुने चैव गोदावरि सरस्वति।

नर्मदे सिन्धु कावेरी जलेऽस्मिन सन्निधिं कुरु॥

Translation: May the holy rivers Ganga, Yamuna, Godavari, Saraswati, Narmada, Sindhu, and Kaveri be present in this water.

Now sprinkle water over your head chanting पुण्डरीकाक्षः

After Bathing,

After offering the Arghya (water offering), while saluting Lord Surya, recite the following mantras:

actualsnek

नमः कमलनाभाय नमस्ते जलशाईने
नमस्ते केशवानंत गृहाॅणार्घयं नमोस्तुते

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते
अनुकंपय मां भक्त्या गृहाॅणार्घयं नमोस्तुते

धातुः कमंडलूद्भूते गंगे त्रिपथगामिनि
त्रैलोक्यवंदिते देवि गृहाॅणार्घयं नमोस्तुते

10. Nitya Pūjā

(Do Pañcāyatana Pūjā)

10.1. Ācamanaṃ

Take a small amount of water in your right hand. Drink three times, and with each sip, *chant:*

ॐ केशवाय नमः

ॐ नारायणाय नमः

ॐ माधवाय नमः

---

actualsnek

Then, wipe both your hands while *chanting:*

ॐ हृषिकेशाय नमः

Om Vishnave Namaha – Wipe the left hand (right palm on top).

Om Madhusudhanaya Namaha – Wipe the right hand (left palm on top).

Om Trivikramaya Namaha – Swipe the upper lip from right to left with thumb.

Om Vamanaya Namaha – Swipe the upper lip from right to left with thumb.

Om Sridharaya Namaha – Place the right palm on the left hand and wipe.

Om Govindaya Namaha – Place the left palm on top of the right hand and wipe.

Om Padmanabhaya Namaha – Sprinkle water on both feet.

Om Damodaraya Namaha – Sprinkle water on the head.

Om Sankarshanaya Namaha – Touch the chin with forefingers.

Om Vasudevaya Namaha – Touch the right nostril.

Om Pradyumnaya Namaha – Touch the left nostril.

Om Aniruddhaya Namaha – Touch the right eye.

Om Purushottamaya Namaha – Touch the left eye.

Om Adhokshajaya Namaha – Touch the right ear.

Om Narasimhaya Namaha – Touch the left ear.

Om Achyutaya Namaha – Touch the navel.

Om Janardhanaya Namaha – Touch the heart.

Om Upendraya Namaha – Touch the head.

Om Hariye Namaha – Touch the right shoulder.

Om Sri Krishnaya Namaha – Touch the left shoulder.

Conclude with:

actualsnek

ॐ श्रीकृष्ण परब्रह्मणे नमो नमः।

Pour water in the right hand, wipe both hands, and offer Namaskaram.

Now, take water in your left hand and sprinkle it on yourself and the worship materials with your right hand while reciting the following verse:

Chant:

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु।

Translation: Whether pure or impure, or in whatever state one may be, if one remembers the Lotus-eyed Lord, one becomes purified.

(Also, arrange the samagri as follows:

Left Side: Jalpatra, Ghanta, Dhupdani; **Right Side:** Deepa, Samkha; **Center:** Kumkum, Chandan, Puspa; **In Front of Murti:** Naivedhya)

10.2 Śikhābandhana

चिद्रूपिणि महामाये दिव्यतेजः समन्विते।

तिष्ठ देवि शिखामध्ये तेजोवृद्धिं कुरुष्व मे॥

---

actualsnek

10.3 Āsana Śuddhi:

Chant the following mantra and sprinkle water on the seat:

विनियोगः -

ॐ पृथ्वीति मंत्रस्य मेकपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता आसन पवित्रकरणे विनियोगः।

ॐ पृथ्वि! त्वया धृता लोका देवि! त्वं विष्णुना धृता।
त्वं च धारय मां देवि! पवित्रां कुरु चासनम्।।

10.4 Kuśa Dhāraṇa

(not required if you've golden ring in Anaamikaa)

With the following mantra, wear three pieces of kuśa grass in the middle part of Anamika of left hand and two pieces in the middle part of Aamika of right hand:

ॐ पवित्रोस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रोण सूर्यस्य रश्मिभिः।

तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्।

10.5 Bhūta-Piśāca Mantra

actualsnek

Chant:

उत्तिष्ठन्तु भूतपिशाचाः येते भूमिभारकाः।

एतेषामविरोधेन ब्रह्मकर्म समारभे॥

Translation: Let the spirits and beings of burden arise, as I begin my daily rituals without obstruction.

10.6 Apply Vibhūti, Kuṅkuma, or Tripuṇḍra

Recite:

कुंकुमं शोभनं दिव्यं सर्वदा मङ्गलप्रदं।

धारणेनास्य शुभदं शान्तिरस्तु सदा मम॥

10.7 Gurusmaraṇam

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः ।।

actualsnek

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।।

अज्ञान तिमिरान्धस्य ज्ञानाञ्जन शलाकया। चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ।।

10.8 Svastivācana

(can be skipped)

After that, take flowers and Akṣata in your hand and recite the Svastyayana.

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानारातिरभि नो निवर्तताम् ।
देवानांऽ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ।
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधम् ।
अर्यमणं वरुणऽ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥

तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।
(only these two line can be recited too, in short of time)

actualsnek

पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा - सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥

अदितिर्द्यौ रदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ।।

द्यौः शान्तिरन्तरिक्ष शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः
।वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व शान्तिः शान्तिरेव
शान्तिः सा मा शान्तिरेधि ।।

यतो यतः समीहसे ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ सुशान्तिर्भवतु ।।

Offer the Puṣpa and Akṣat held in your hands to Lord Ganesha and Goddess Gauri.

Then, take Puṣpa, Akṣat, etc., in your hands again and recite the Maṅgala Śloka.

श्रीमन्महागणाधिपतये नमः।
लक्ष्मीनारायणाभ्यां नमः।
उमामहेश्वराभ्यां नमः।
वाणीहिरण्यगर्भाभ्यां नमः।
शचीपुरन्दराभ्यां नमः।
मातापितृचरणकमलेभ्यो नमः।
इष्टदेवताभ्यो नमः।
कुलदेवताभ्यो नमः।
ग्रामदेवताभ्यो नमः।
वास्तुदेवताभ्यो नमः।
स्थानदेवताभ्यो नमः।
सर्वेभ्यो देवेभ्यो नमः।
सर्वेभ्यो ब्राह्मणेभ्यो नमः।

actualsnek

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ।। 1।।

वक्रतुण्ड ! महाकाय ! कोटिसूर्यसमप्रभ ! ।
निर्विघ्नं कुरु मे देव ! सर्वकार्येषु सर्वदा ।। 2।।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।। 3।।

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।। 4।।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ।। 5।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।। 6।।

अभीप्सितार्थ-सिद्धार्थं पूजितो यः सुराऽसुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ।। 7।।

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ! ।
शरण्ये त्रयम्बके गौरि नारायणि ! नमोऽस्तु ते ।। 8।।

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ।। 9।।

actualsnek

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्यावलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।। 10।।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ।। 11।।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।।12।।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।। 13।।

स्मृतेः सकलकल्याणं भाजनं यत्र जायते ।
पुरुषं तमजं नित्यं ब्रजामि शरणं हरिम् ।। 14।।

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ।। 15।।

Offer the rice Akṣat and Puṣpa held in your hand to Lord Ganesha and Goddess Ambika.

10.9 Saṅkalpa (laghu)

शुभे शोभने मुहूर्ते अद्य ब्रह्मणोऽह्नि द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलीयुगे तत्प्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशे मिथिलानगरे __नामसंवत्सरे __अयनं __ऋतौ __मासे __पक्षे __तिथौ __नक्षत्रयुक्तायां शुभयोग शुभकरण एवं गुणविशेषणविशिष्टायां ममोपात्त-समस्त-दुरित-क्षयद्वारां श्री-परमेश्वर-प्रियार्थं अस्माकं सह-कुटुम्बानां क्षेम-स्थैर्य-वीर्य-विजय-आयुरारोग्य-ऐश्वर्य अभिवृद्ध्यर्थं धर्मार्थ-काम-मोक्ष चतुर्विध-फल-पुरुषार्थ-सिद्ध्यर्थं इच्छित-काम्यार्थ-सिद्ध्यर्थं सर्वाभीष्ट-सिद्ध्यर्थं सर्वारिष्ट-शान्त्यर्थं अरोग-धृढ-गात्रता-सिद्ध्यर्थं अस्मिन-जन्मनि जन्मान्ते भगवत्स्मरणेन सह अनायास-मरण-प्राप्त्यर्थं, जन्मान्तरेऽपि मनुष्य-जन्म-प्राप्ति-द्वारा परमात्मनि अत्यन्त-भक्ति-सिद्ध्यर्थं, एकान्त-भक्ति-सिद्ध्यर्थं अद्वैत-भक्ति-सिद्ध्यर्थं विष्णुशिवगणेशसूर्यदुर्गार्चनं करिष्ये।

---

actualsnek

10.10 Kalasa Puja

(skip this)

कलशपूजां करिष्ये।

Decorate the water-filled Panchapatram with Sandalwood, Kumkum, and flowers.

कलशस्य आधारे द्वादशकलात्मनेऽम र्कमण्डलाय नमः।

मध्ये दषकलात्मने मम वह्निमण्डलाय नमः।

मुखे षोडशकलात्मने उम सोममण्डलाय नमः।।

इन्द्राय नमः । यमाय नमः । वरुणाय नमः । सोमाय नमः ।

---

actualsnek

तत्पुरुषाय नमः (east of the Paatram)

अघोराय नमः (South)

वामदेवाय नमः (North)

सद्योजाताय नमः (West)

ईशानाय नमः (on the water in the Paatram)

थम्वं अमृते अमृतोद्भवे अमृतमयास्रावय श्रावय (Show the dhenu mudra)

Now place your right palm on the top of the panca-pAtram.

कलशस्य मुखे विष्णु: कंठे रुद्र: समाश्रित:
मूले त्त्राअस्थितो ब्रह्मा मध्ये मातृगणा: स्मृता: ॥

कुक्षौ तु सागरा: सर्वे सप्तद्वीपा वसुंधरा ।
ऋग्वेदोऽथ यजुर्वेद: सामवेदो ह्यथर्वण: ।
अंगैश्च सहिता: सर्वे कलशं तु समाश्रिताः ।
अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा ।
आयांतु देविपूजार्थ दुरितक्षयकारकाः ॥

गंगे च यमुने चैव गोदावरि सरस्वती ।
नर्मदे, सिंधु, कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

श्रीवरुणाय नमः ।

actualsnek

Then Samkha Puja (skip)

10.11 Then meditate on the Pancha Devatas. After that, hold the Aksata in your hand for the Ahwahana (if you don't have the Panchayatna Murti at home).

Vishnu	Shiva	Surya
Devi		Ganesh

Now do आवाहन -

आगच्छन्तु सुरश्रेष्ठा भवन्त्वत्र स्थिराः समे।
यावत् पूजां करिष्यामि तावत् तिष्ठन्तु सन्निधौ ॥

ॐ विष्णुशिवगणेशसूर्यदुर्गाभ्यो नमः, आवाहनार्थे पुष्यं समर्पयामि।

(offer the flowers)

- Offer Tulsi –
- Offer Jala –
- Offer Arghya –

actualsnek

10.12 Now, do **Archana** of Five dieties:

ॐ मित्राय नमः, ॐ रवये नमः, ॐ सूर्याय नमः, ॐ भानवे नमः, ॐ खगाय नमः, ॐ पूष्णे नमः, ॐ हिरण्यगर्भाय नमः, ॐ मरीचये नमः, ॐ आदित्याय नमः, ॐ सवित्रे नमः, ॐ अर्काय नमः, ॐ भास्कराय नमः

ॐ सुमुखाय नमः, ॐ एकदंताय नमः, ॐ कपिलाय नमः, ॐ गजकर्णकाय नमः, ॐ लंबोदराय नमः, ॐ विकटाय नमः, ॐ विघ्नराजाय नमः , ॐ गणाधिपतये नमः, ॐ धूम्रकेतवे नमः, ॐ गणाध्यक्षाय नमः, ॐ भालचंद्राय नमः, ॐ गजाननाय नमः

ॐ भवस्य देवस्य पत्न्यै नमः। ॐ शर्वस्य देवस्य पत्न्यै नमः। ॐ ईशानस्य देवस्य पत्न्यै नमः। ॐ पशुपतेर्देवस्य पत्न्यै नमः। ॐ रुद्रस्य देवस्य पत्न्यै नमः। ॐ उग्रस्य देवस्य पत्न्यै नमः। ॐ भीमस्य देवस्य पत्न्यै नमः। ॐ महतो देवस्य पत्न्यै नमः।

ॐ भवाय देवाय नमः। ॐ शर्वाय देवाय नमः। ॐ ईशानाय देवाय नमः। ॐ पशुपतये देवाय नमः। ॐ रुद्राय देवाय नमः। ॐ उग्राय देवाय नमः। ॐ भीमाय देवाय नमः। ॐ महते देवाय नमः।

ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः। ॐ गोविंदाय नमः। ॐ विष्णवे नमः। ॐ मधुसूदनाय नमः। ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः। ॐ श्रीधराय नमः। ॐ ऋषिकेशाय नमः। ॐ पद्मनाभाय नमः। ॐ दामोदराय नमः।

actualsnek

10.13 Pañcōpācāra Pūjā

10.13.1 Gandha

Offer Chandanam to God.

Mantra:

ॐ गन्धम् समर्पयामि

10.13.2. Pushpa

Offer Pushpa to God.

Mantra:

ॐ सुगन्धिनि सुगन्धि माले वेलयाऽनुलिप्तयाः।
सुह्रदोऽसि महाभागे देवि द्रव्यं सुगन्धि मे॥

ॐ पुष्पम् समर्पयामि ।

10.13.3. Dhoop

Light incense sticks in front of God and offer fragrance.

Mantra:

ॐ धूपं आग्रायति नो देवाः सर्वे तेन प्रीयताम्।
सर्वे च सर्वभूतानाम् अद्य तेन प्रीयताम्॥

धूपानंतरं शुद्ध आचमनीयं समर्पयामि।

(Pour one udraNi of water in the apA-pAtraM)

actualsnek

10.13.4. Deep

Light a lamp in front of God and perform the Aarti.

HowTo: *Take the first three batis (small wick) of cotton and merge them into one. First, pour oil into the lamp, then place the merged bati in the diya, dipping it in oil and light it. Place the diya facing east or north - towards yourself for kāmanāpūrtī (fulfillment of desires) or towards God for mukti, jñāna.*

Mantra:

भो दीप! ब्रह्मरूपेण सर्वेषां हृदि संस्थितः।
अतस्त्वां स्थापयाम्यद्य मदज्ञानमपाकुरु॥

दीपानंतरं शुद्ध आचमनीयं समर्पयामि॥
(Pour one udraNi of water in the apA-pAtraM)

10.13.5. Naivedya

Offer food to God.

Mantra:

ॐ नैवेद्यं निवेदयामि।

नैवेद्यानंतरं शुद्ध आचमनीयं समर्पयामि॥
(Pour one udraNi of water in the apA-pAtraM)

---

actualsnek

10.14 Stuti

(do one-two stuti, if time permits)

Ganesha Stuti:

वक्रतुण्ड ! महाकाय ! कोटिसूर्यसमप्रभ ! ।
निर्विघ्नं कुरु मे देव ! सर्वकार्येषु सर्वदा ।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुति यज्ञ विभूषिताय गौरीसुताय गणनाथ नमोऽस्तुते ॥

देवदेव जगन्नाथ, लोकानुग्रहकारक।
एकदन्त उमापुत्र, नमस्येहं जगद्गुरो॥

actualsnek

गणेश-द्वादशनामस्तोत्रम्:

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते।।

Vishnu Stuti:

शान्ताकारं भुजंगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगन सदृशं मेघवर्ण शुभांगम् ।
लक्ष्मीकांत कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णु भवभयहरं सर्व लौकेक नाथम् ॥

औषधे चिंतये विष्णुम, भोजने च जनार्धनम ।
शयने पद्मनाभं च, विवाहे च प्रजापतिम||

युद्धे चक्रधरम देवं, प्रवासे च त्रिविक्रमं|
नारायणं तनु त्यागे, श्रीधरं प्रिय संगमे||

actualsnek

दुःस्वप्ने स्मर गोविन्दम,संकटे मधुसूधनम|
कानने नारासिम्हम च,पावके जलाशयिनाम||

जलमध्ये वराहम च, पर्वते रघु नन्दनं|
गमने वामनं चैव, सर्व कार्येशु माधवं||

षोडशैतानी नमानी प्रातरुत्थाय यह पठेत
सर्वपापा विर्निमुक्तो विष्णुलोके महीयते ||

Shiva Stuti – 1

Sandhya Krita Shiva Stotram:

निराकारं ज्ञानगम्यं परं यन्नैव स्थूलं नापि सूक्ष्मं न चोच्चम् ।
अन्तश्चिन्त्यं योगिभिस्तस्य रूपं तस्मै तुभ्यं लोककर्ते नमोऽस्तु ॥

शर्वं शान्तं निर्मलं निर्विकारं ज्ञानगम्यं स्वप्रकाशेऽविकारम् ।
खाध्वप्रख्यं ध्वान्तमार्गात्परस्ताद् रूपं यस्य त्वां नमामि प्रसन्नम् ॥

एकं शुद्धं दीप्यमानं विनाजां चिदानन्दं सहजं चाविकारि ।
नित्यानन्दं सत्यभूतिप्रसन्नं यस्य श्रीदं रूपमस्मै नमस्ते ॥

विद्याकारोद्भावनीयं प्रभिन्नं सत्त्वच्छन्दं ध्येयमात्मस्वरूपम्।
सारं पारं पावनानां पवित्रं तस्मै रूपं यस्य चैवं नमस्ते ॥

यत्त्वाकारं शुद्धरूपं मनोज्ञ रत्नाकल्पं स्वच्छकर्पूरगौरम् ।
इष्टाभीती शूलमुण्डे दधानं हस्तैर्नमो योगयुक्ताय तुभ्यम् ॥

गगनं भूर्दिशश्चैव सलिलं ज्योतिरेव च।
पुनः कालश्च रूपाणि यस्य तुभ्यं नमोऽस्तु ते ॥

प्रधान पुरुषौ यस्य कायत्वेन विनिर्गतौ।
तस्मादव्यक्तरूपाय शंकराय नमो नमः ।।

यो ब्रह्मा कुरुते सृष्टिं यो विष्णुः कुरुते स्थितिम् ।
संहरिष्यति यो रुद्रस्तस्मै तुभ्यं नमो नमः ॥

actualsnek

नमो नमः कारणकारणाय दिव्यामृतज्ञानविभूतिदाय।
समस्तलोकान्तरभूतिदाय प्रकाशरूपाय परात्पराय।।

यस्यापरं नो जगदुच्यते पदात् क्षितिर्दिशः सूर्य इन्दुर्मनोजः ।
बहिर्मुखा नाभितश्चान्तरिक्षं तस्मै तुभ्यं शम्भवे मे नमोऽस्तु ॥

त्वं परः परमात्मा च त्वं विद्या विविधा हरः ।
सद्ब्रह्म च परं ब्रह्म विचारणपरायणः ॥

यस्य नादिर्न मध्यं च नान्तमस्ति जगद्यतः ।
कथं स्तोष्यामि तं देवमवाङ्मनसगोचरम् ।।

यस्य ब्रह्मादयो देवा मुनयश्च तपोधनाः ।
न विपृण्वन्ति रूपाणि वर्णनीयः कथं स मे ॥

स्त्रिया मया ते किं ज्ञेया निर्गुणस्य गुणाः प्रभो ।
नैव जानन्ति यरूपं सेन्द्रा अपि सुरासुराः ॥

नमस्तुभ्यं महेशान नमस्तुभ्यं तपोमय ।
प्रसीद शम्भो देवेश भूयो भूयो नमोऽस्तु ते ॥

actualsnek

Shiva Stuti – 2

Shiva Panchakshara Stotram:

नागेन्द्रहाराय त्रिलोचनाय, भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय, तस्मै नकाराय नमः शिवाय ॥१॥

मन्दाकिनीसलिलचन्दनचर्चिताय, नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय, तस्मै मकाराय नमः शिवाय ॥२॥

शिवाय गौरीवदनाब्जवृंद, सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय, तस्मै शिकाराय नमः शिवाय ॥३॥

actualsnek

वशिष्ठकुम्भोद्भवगौतमार्य , मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय, तस्मै वकाराय नमः शिवाय ॥४॥

यक्षस्वरूपाय जटाधराय, पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय, तस्मै यकाराय नमः शिवाय ॥५॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥६॥

Shiva Stuti – 3

Rudrashtakam:

नमामीशमीशान निर्वाणरूपं। विभुं व्यापकं ब्रह्मवेदस्वरूपम्॥
निजं निर्गुणं निर्विकल्पं निरीहं। चिदाकाशमाकाशवासं भजे हं।।
निराकारमोंकारमूलं तुरीयं। गिरा ग्यान गोतीतमीशं गिरीशं।
करालं महाकाल कालं कृपालं। गुणागार संसारपारं नतो हं।।

तुषाराद्रि संकाश गौरं गम्भीरं। मनोभूत कोटि प्रभा श्री शरीरं।
स्फुरन्मौलि कल्लोलिनी चारु गंगा। लसद्भालबालेन्दु कण्ठे भुजंगा।।
चलत्कुण्डलं भ्रू सुनेत्रं विशालं। प्रसन्नाननं नीलकण्ठं दयालं।।
मृगाधीशचर्माम्बरं मुण्डमालं। प्रियं शंकरं सर्वनाथं भजामि।।

प्रचण्डं प्रकृष्टं प्रगल्भं परेशं। अखण्डं अजं भानुकोटिप्रकाशम्।
त्रय: शूल निर्मूलनं शूलपाणिं। भजे हं भवानीपतिं भावगम्यं।।
कलातीत कल्याण कल्पांतकारी। सदासज्जनानन्ददाता पुरारी।
चिदानन्द संदोह मोहापहारी। प्रसीद प्रसीद प्रभो मन्मथारी।।
न यावद् उमानाथ पादारविंदं। भजंतीह लोके परे वा नराणां।
न तावत्सुखं शान्ति सन्तापनाशं। प्रसीद प्रभो सर्वभूताधिवासं।।
न जानामि योगं जपं नैव पूजां। नतो हं सदा सर्वदा शम्भु तुभ्यं।
जराजन्म दु:खौघ तातप्यमानं। प्रभो पाहि आपन्न्मामीश शंभो।।

रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतोषये। ये पठन्ति नरा भक्तया तेषां शम्भु: प्रसीदति॥

---

actualsnek

Devi Stuti – 1

अर्जुन कृत श्री दुर्गा स्तोत्रम्:

नमस्ते सिद्धसेनानि आर्ये मन्दरवासिनि ।
कुमारि कालि कापालि कपिले कृष्णपिङ्गले ॥ 1 ॥

भद्रकालि नमस्तुभ्यं महाकालि नमोऽस्तु ते ।
चण्डि चण्डे नमस्तुभ्यं तारिणि वरवर्णिनि ॥ 2 ॥

कात्यायनि महाभागे करालि विजये जये ।
शिखिपिञ्छध्वजधरे नानाभरणभूषिते ॥ 3 ॥

actualsnek

अट्टशूलप्रहरणे खड्गखेटकधारिणि ।
गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे ॥ 4 ॥

महिषासृक्प्रिये नित्यं कौशिकि पीतवासिनि ।
अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये ॥ 5 ॥

उमे शाकम्भरि श्वेते कृष्णे कैटभनाशिनि ।
हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते ॥ 6 ॥

वेदश्रुतिमहापुण्ये ब्रह्मण्ये जातवेदसि ।
जम्बूकटकचैत्येषु नित्यं सन्निहितालये ॥ 7 ॥

त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम् ।
स्कन्दमातर्भगवति दुर्गे कान्तारवासिनि ॥ 8 ॥

स्वाहाकारः स्वधा चैव कला काष्ठा सरस्वती ।
सावित्री वेदमाता च तथा वेदान्त उच्यते ॥ 9 ॥

स्तुतासि त्वं महादेवि विशुद्धेनान्तरात्मना ।
जयो भवतु मे नित्यं त्वत्प्रसादाद्रणाजिरे ॥ 10 ॥

कान्तारभयदुर्गेषु भक्तानां चालयेषु च ।
नित्यं वससि पाताले युद्धे जयसि दानवान् ॥ 11 ॥

त्वं जम्भनी मोहिनी च माया ह्रीः श्रीस्तथैव च ।
सन्ध्या प्रभावती चैव सावित्री जननी तथा ॥ 12 ॥

तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चन्द्रादित्यविवर्धिनी ।
भूतिर्भूतिमतां सङ्ख्ये वीक्ष्यसे सिद्धचारणैः ॥ 13 ॥

actualshek

इति श्रीमन्महाभारते भीष्मपर्वणि त्रयोविंशोऽध्याये अर्जुन कृत श्री दुर्गा स्तोत्रम् ।

Devi Stuti – 2

तन्त्रोक्तं देवी सूक्तम्:

नमो देव्यै महादेव्यै शिवायै सततं नम:।
नम: प्रकृत्यै भदायै नियता: प्रणता: स्मताम्।।

रौदायै नमो नित्यायै गौयैर् धात्रयै नमो नम:।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमो नम:।।

कल्याण्यै प्रणतां वृद्धयै सिद्धयै कुमोर् नमो नम:।
नैऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नम:।।

actualsnek

दुर्गार्य दुर्गपारार्य सारार्य सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रार्य सततं नम:।।

अतिसौम्यातिरौदार्य नतास्तस्यै नमो नम:।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नम:।।

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नम:।।

या देवी सर्वभूतेषु चेतनेत्याभिधीयते।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नम:।।

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नम:।।

या देवी सर्वभूतेषु निदारूपेण संस्थिता।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः।।

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः।।

या देवी सर्वभूतेषुच्छायारूपेण संस्थिता।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः।।

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता :।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः।।

---

actualsnek

Surya Stuti – 1

Recite **Surya Shatkama** by Mayur-Bhatta: at least two shloka-s daily.

Surya Stuti – 2

Aditya Hridaya Stotra:

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद्राममगस्त्यो भगवांस्तदा ॥२॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसे ॥३॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपं नित्यमक्षयं परमं शिवम् ॥४॥

actualsnek

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥५॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥६॥

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः ॥७॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥८॥

पितरो वसवः साध्या अश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ॥९॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥१०॥

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान् ॥११॥

हिरण्यगर्भः शिशिरस्तपनो ऽहस्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥१२॥

व्योमनाथस्तमोभेदी ऋग्यजुः सामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥१३॥

actualshek

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तुते ॥१५॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥१६॥

जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ॥१७॥

नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तुते ॥१८॥

ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥२०॥

तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥२१॥

नाशयत्येष वै भूतं तमेष सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥२२॥

actualsnek

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥२३॥

देवाश्च क्रतवश्चैव क्रतूनां फलमेव च।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥२४॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥२५॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥२६॥

अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२७॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९॥

रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत् ।
सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ॥३०॥

अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥३१॥

actualshek

॥ श्रीवाल्मीकीये रामायणे युद्धकाण्डे, अगस्त्य-प्रोक्तमादित्यहृदय-
स्तोत्रं सम्पूर्णम् ॥

Surya Stuti – 3

Dwadasa Arya Surya Stuti:

उद्यन्नद्यविवस्वानारोहन्नुत्तरां दिवं देवः ।
हृद्रोगं मम सूर्यो हरिमाणं चाऽऽशु नाशयतु ॥ 1 ॥

निमिषार्धेनैकेन द्वे च शते द्वे सहस्रे द्वे ।
क्रममाण योजनानां नमोऽस्तु ते नलिननाथाय ॥ 2 ॥

कर्मज्ञानखदशकं मनश्च जीव इति विश्वसर्गाय ।
द्वादशधा यो विचरति स द्वादशमूर्तिरस्तु मोदाय ॥ 3 ॥

actualsnek

त्वं हि यजूॠक्सामः त्वमागमस्त्वं वषट्कारः ।
त्वं विश्वं त्वं हंसः त्वं भानो परमहंसश्च ॥ 4 ॥

शिवरूपात् ज्ञानमहं त्वत्तो मुक्तिं जनार्दनाकारात् ।
शिखिरूपादैश्वर्यं त्वत्तश्चारोग्यमिच्छामि ॥ 5 ॥

त्वचि दोषा दृशि दोषाः हृदि दोषा येऽखिलेन्द्रियजदोषाः ।
तान् पूषा हतदोषः किञ्चिद्रोषाग्निना दहतु ॥ 6 ॥

धर्मार्थकाममोक्षप्रतिरोधानुग्रतापवेगकरान् ।
बन्दीकृतेन्द्रियगणान् गदान् विखण्डयतु चण्डांशुः ॥ 7 ॥

येन विनेदं तिमिरं जगदेत्य ग्रसति चरमचरमखिलम् ।
धृतबोधं तं नलिनीभर्तारं हर्तारमापदामीडे ॥ 8 ॥

यस्य सहस्राभीशोरभीशु लेशो हिमांशुबिम्बगतः ।
भासयति नक्तमखिलं भेदयतु विपद्गणानरुणः ॥ 9 ॥

तिमिरमिव नेत्रतिमिरं पटलमिवाऽशेषरोगपटलं नः ।
काशमिवाधिनिकायं कालपिता रोगयुक्ततां हरतात् ॥ 10 ॥

वाताश्मरीगदार्शस्त्वग्दोषमहोदरप्रमेहांश्च ।
ग्रहणीभगन्धराख्या महतीस्त्वं मे रुजो हंसि ॥ 11 ॥

त्वं माता त्वं शरणं त्वं धाता त्वं धनं त्वमाचार्यः ।
त्वं त्राता त्वं हर्ता विपदामर्क प्रसीद मम भानो ॥ 12 ॥

इत्यार्याद्वादशकं साम्बस्य पुरो नभःस्थलात्पतितम् ।
पठतां भाग्यसमृद्धिः समस्तरोगक्षयश्च स्यात् ॥ 13 ॥

actualsnek

इति श्रीसाम्बकृतद्वादशार्यासूर्यस्तुतिः ।

10.15 Karpura-nīrājana

ॐ कर्पूर गौरं करूणावतारं , संसार सारं भुजगेन्द्रहारम् ।।
सदा बसन्तं हृदयारविन्दे , भवं भवानी सहितं नमामि ।।

ॐ सांगाय सपरिवाराय सांबपरमेश्वराय नमः।
आवाहिताभ्यस्सर्वाभ्यो देवताभ्यो नमः।

कर्पूरनीराजनं दर्शयामि॥

नीराजनानंतरं शुद्ध आचमनीयं समर्पयामि॥

(Pour one udraNi of water in the apA-pAtraM)

10.16 Pradakshina

Perform four circumambulations while chanting the following Mantra. If there is no space for circumambulation, simply turn around four times in your darbha-asana.
In temples, do 4 pradakshinas for Vishnu and 3 for Devi, Vinayaka, Shiva, etc. At home, do atma pradakshina. In temples with a Dwaja Stambham, do physical pradakshinas, not atma pradakshina.

---

actualsnek

यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

ॐ सांगाय सपरिवाराय सांबपरमेश्वराय नमः।
आवाहिताभ्यस्सर्वाभ्यो देवताभ्यो नमः।
प्रदक्षिण-नमस्कारान् समर्पयामि॥

10.17 Kshma Prarthana

त्वमेव माता च पिता त्वमेव , त्वमेव बन्धुश्चसखात्वमेव।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव ।।

ॐ यदक्षरपदभ्रष्टं मात्राहीनं तु यद् भवेत्।
तत्सर्वं क्षम्यतां देव नारायण नमोस्तुते ।

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च।
न्यूनानि चातिरिक्तानि क्षमस्व परमेश्वर ।

अपराध सहस्राणि क्रियन्तेऽहर्निशं मया।
तानिसर्वाणि मे देव क्षमस्व महेश्वर ।

अन्यथा शरणं नास्ति त्वमेव शरणं मम।
तस्मात् कारुण्य भावेन रक्ष रक्ष जनार्दन ।

10.18 Samapan

Do Sāṣṭāṅga praṇāma.

actualsnek

ॐ पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः।

त्राहि माम् पुण्डरीकाक्ष सर्वपाप हरो भव ॥

Drop two-four drops of water on the ground beneath your seat and touch it to your forehead.

Sprinkle a little water near the offering (naivedya) and then set the offering aside.

At sunset, be sure to light a lamp at the place of worship; if possible, also light incense, as it is considered auspicious. The lamp should face north.